# Natya Shastra Chapter 19

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૯

## Document Information


Text title : naaTyashaastra adhyaaya 19

File name : natya19.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : October 6, 2001

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 19

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૯

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ એકોનવિંશોઽધ્યાયઃ ।

ઇતિવૃત્તં તુ નાટ્યસ્ય શરીરં પરિકીર્તિતમ્ ।
પઞ્ચભિઃ સન્ધિભિસ્તસ્ય વિભાગઃ સમ્પ્રકલ્પિતઃ ॥ ૧॥

ઇતિવૃત્તં દ્વિધા ચૈવ બુધસ્તુ પરિકલ્પયેત્ ।
આધિકરિકમેકં સ્યાત્ પ્રાસઙ્ગિકમથાપરમ્ ॥ ૨॥

યત્કાર્યં હિ ફલપ્રાપ્ત્યા સામર્થ્યાત્પરિકલ્પ્યતે ।
તદાધિકારિકં જ્ઞેયમન્યત્પ્રાસઙ્ગિકં વિદુઃ ॥ ૩॥

કારણાત્ફલયોગ્યસ્ય વૃત્તં સ્યાદાધિકારિકમ્ ।
તસ્યોપકરણાર્થં તુ કીર્ત્યતે હ્યાનુષઙ્ગિકમ્ ॥ ૪॥

કવેઃ પ્રયત્નાન્નેતૃણાં યુક્તાનાં વિદ્ધ્યુપાશ્રયાત્ ।
કલ્પ્યતે હિ ફલપ્રાપ્તિઃ સમુત્કર્ષાત્ફલસ્ય ચ ॥ ૫॥

(લૌકિકી સુખદુઃખાખ્યા યથાવસ્થા રસોદ્ભવા ।
દશધા મન્મથાવસ્થા વ્યવસ્થાસ્ત્રિવિધા મતા ॥) ૬॥

સંસારે ફલયાગે તુ વ્યાપારઃ કારણસ્ય યઃ ।
તસ્યાનુપૂર્વ્યા વિજ્ઞેયા પઞ્ચાવસ્થા પ્રયોક્તૃભિઃ ॥ ૭॥

પ્રારમ્ભશ્ચ પ્રયત્નશ્ચ તથા પ્રાપ્તેશ્ચ સંભવઃ ।
નિયતા ચ ફલપ્રાપ્તિઃ ફલયોગશ્ચ પઞ્ચમઃ ॥ ૮॥

ઔત્સુક્યમાત્રબન્ધસ્તુ યદ્બીજસ્ય નિબધ્યતે ।
મહતઃ ફલયોગસ્ય સ ફલારમ્ભ ઇષ્યતે ॥ ૯॥

અપશ્યતઃ ફલપ્રાપ્તિં વ્યાપારો યઃ ફલં પ્રતિ ।

પરં ચૌત્સુક્યગમનં સ પ્રયત્નઃ પ્રકીર્તિતઃ ॥ ૧૦॥

ઈષત્પ્રાપ્તિર્યદા કાચિત્ફલસ્ય પરિકલ્પતે ।
ભાવમાત્રેણ તુ પ્રાહુર્વિધિજ્ઞાઃ પ્રાપ્તિસમ્ભવમ્ ॥ ૧૧॥

નિયતાં તુ ફલપ્રાપ્તિં યદા ભાવેન પશ્યતિ ।
નિયતાં તાં ફલપ્રાપ્તિં સગુણાં પરિચક્ષતે ॥ ૧૨॥

અભિપ્રેતં સમગ્રં ચ પ્રતિરૂપં ક્રિયાફલમ્ ।
ઇતિવૃત્તે ભવેદ્યસ્મિન્ ફલયોગઃ પ્રકીર્તિતઃ ॥ ૧૩॥

સર્વસ્યૈવ હિ કાર્યસ્ય પ્રારબ્ધસ્ય ફલાર્થિભિઃ ।
એતાસ્ત્વનુક્રમેણૈવ પઞ્ચાવસ્થા ભવન્તિ હિ ॥ ૧૪॥

આસાં સ્વભાવભિન્નાનાં પરસ્પરસમાગમાત્ ।
વિન્યાસ એકભાવેન ફલહેતુઃ પ્રકીર્તિતઃ ॥ ૧૫॥

ઇતિવૃત્તં સમાખ્યાતં પ્રત્યગેવાધિકારિકમ્ ।
તદારમ્ભાદિ કર્તવ્યં ફલાન્તં ચ યથા ભવેત્ ॥ ૧૬॥

પૂર્ણસન્ધિ ચ કર્તવ્યં હીનસન્ધ્યપિ વા પુનઃ ।
નિયમાત્ પૂર્ણસન્ધિ સ્યાદ્ધીનસન્ધ્યથ કારણાત્ ॥ ૧૭॥

એકલોપે ચતુર્થસ્ય દ્વિલોપે ત્રિચતુર્થયોઃ ।
દ્વિતીયત્રિચતુર્થાનાં ત્રિલોપે લોપ ઇષ્યતે ॥ ૧૮॥

પ્રાસઙ્ગિકે પરાર્થત્વાન્ન હ્યેષ નિયમો ભવેત્ ।
યદ્વૃત્તં સમ્ભવેત્તત્ર તદ્યોજ્યમવિરોધતઃ ॥ ૧૯॥

ઇતિવૃત્તે યથાવસ્થાઃ પઞ્ચારમ્ભાદિકાઃ સ્મૃતાઃ ।
અર્થપ્રકૃતયઃ પઞ્ચ તથા બીજાદિકા અપિ ॥ ૨૦॥

બીજં બિન્દુઃ પતાકા ચ પ્રકરી કાર્યમેવ ચ ।
અર્થપ્રકૃતયઃ પઞ્ચ જ્ઞાત્વા યોજ્યા યથાવિધિ ॥ ૨૧॥

સ્વલ્પમાત્રં સમુત્સૃષ્ટં બહુધા યદ્વિસર્પતિ ।
ફલાવસાનં યચ્ચૈવ બીજં તત્પરિકીર્તિતમ્ ॥ ૨૨॥

પ્રયોજનાનાં વિચ્છેદે યદવિચ્છેદકારણમ્ ।
યાવત્સમાપ્તિર્બન્ધસ્ય સ બિન્દુઃ પરિકીર્તિતઃ ॥ ૨૩॥

યદ્વૃત્તં તુ પરાર્થં સ્યાત્ પ્રધાનસ્યોપકારકમ્
પ્રધાનવચ્ચ કલ્પ્યેત સા પતાકેતિ કીર્તિતા ॥ ૨૪॥

ફલં પ્રકલ્પ્યતે યસ્યાઃ પરાર્થાયૈવ કેવલમ્ ।
અનુબન્ધવિહીનત્વાત્ પ્રકરીતિ વિનિર્દિશેત્ ॥ ૨૫।
યદાધિકારિકં વસ્તુ સમ્યક્ પ્રાજ્ઞૈઃ પ્રયુજ્યતે ।
તદર્થો યઃ સમારમ્ભસ્તત્કાર્યં પરિકીર્તિતમ્ ॥ ૨૬॥

એતેષાં યસ્ય યેનાર્થો યતશ્ચ ગુણ ઇષ્યતે ।
તત્ પ્રધાનં તુ કર્તવ્યં ગુણભૂતાન્યતઃ પરમ્ ॥ ૨૭॥

એકોઽનેકોઽપિ વા સન્ધિઃ પતાકાયાં તુ યો ભવેત્ ।
પ્રધાનાર્થાનુયાયિત્વાદનુસન્ધિઃ પ્રકીર્ત્યતે ॥ ૨૮॥

આગર્ભાદાવિમર્શાદ્વા પતાકા વિનિવર્તતે ।
કસ્માદ્યસ્માન્નિબન્ધોઽસ્યાઃ પરાર્થઃ પરિકીર્ત્યતે ॥ ૨૯॥

યત્રાર્થે ચિન્તિતેઽન્યસ્મિન્સ્તલ્લિન્ઙ્ગોઽન્યઃ પ્રયુજ્યતે ।
આગન્તુકેન ભાવેન પતાકાસ્થાનકં તુ તત્ ॥ ૩૦।
સહસૈવાર્થસમ્પત્તિર્ગુણવત્યુપકારતઃ ।
પતાકાસ્થાનકમિદં પ્રથમં પરિકીર્તિતમ્ ॥ ૩૧॥

વચઃ સાતિશયં ક્લિષ્ટં કાવ્યબન્ધસમાશ્રયમ્ ।
પતાકાસ્થાનકમિદં દ્વિતીઅયં પરિકીર્તિતમ્ ॥ ૩૨॥

અર્થોપક્ષેપણં યત્ર લીનં સવિનયં ભવેત્ ।
શ્લિષ્ટપ્રત્યુત્તરોપેતં તૃતીયમિદમિષ્યતે ॥ ૩૩॥

દ્વ્યર્થો વચનવિન્યાસઃ સુશ્લિષ્ટઃ કાવ્યયોજિતઃ ।
ઉપન્યાસસુયુક્તશ્ચ તચ્ચતુર્થમુદાહૃતમ્ ॥ ૩૪॥

[યત્ર સાતિશયં વાક્યમર્થોપક્ષેપણં ભવેત્ ।
વિનાશિદૃષ્ટમન્તે ચ પતાકાર્ધં તુ તદ્ભવેત્ ]॥ ૩૫॥

ચતુષ્પતાકાપરમં નાટકે કાર્યયિષ્યતે ।
પઞ્ચભિઃ સન્ધિભિર્યુક્તં તાંશ્ચ વક્ષ્યામ્યતઃ પરમ્ ॥૩૬॥

મુખં પ્રતિમુખં ચૈવ ગર્ભો વિમર્શ એવ ચ ।
તથા નિર્વહણં ચેતિ નાટકે પઞ્ચ સન્ધયઃ ॥ ૩૭॥

[પઞ્ચભિઃ સન્ધિભિર્યુક્તં પ્રધાનમનુ કીર્ત્યતે ।
શેષાઃ પ્રધાનસન્ધીનામનુગ્રાહ્યનુસન્ધયઃ ]॥ ૩૮॥

યત્ર બીજસમુત્પત્તિર્નાનાર્થરસસમ્ભવા ।
કાવ્યે શરીરાનુગતા તન્મુખં પરિકીર્તિતમ્ ॥ ૩૯॥

બીજસ્યોદ્ઘાટનં યત્ર દૃષ્ટનષ્ટમિવ ક્વચિત્ ।
મુખન્યસ્તસ્ય સર્વત્ર તદ્વૈ પ્રતિમુખં સ્મૃતમ્ ॥ ૪૦॥

ઉદ્ભેદસ્તસ્ય બીજસ્ય પ્રાપ્તિરપ્રાપ્તિરેવ વા ।
પુનશ્ચાન્વેષણં યત્ર સ ગર્ભ ઇતિ સંજ્ઞિતઃ ॥ ૪૧॥

ગર્ભનિર્ભિન્નબીજાર્થો વિલોભનકૃતોઽથવા ।
ક્રોધવ્યસનજો વાપિ સ વિમર્શ ઇતિ સ્મૃતઃ ॥ ૪૨॥

સમાનયનમર્થાનાં મુખાદ્યાનાં સબીજિનામ્ ।
નાનાભાવોત્તરાણાં યદ્ભવેન્નિર્વહણં તુ તત્ ॥ ૪૩॥

એતે તુ સન્ધયો જ્ઞેયા નાટકસ્ય પ્રયોક્તૃભિઃ ।
તથા પ્રકરણાસ્યાપિ શેષાણાં ચ નિબોધત ॥ ૪૪॥

ડિમઃ સમવકારશ્ચ ચતુઃસન્ધી પ્રકીર્તિતૌ ।
ન તયોરવમર્શસ્તુ કર્તવ્યઃ કવિભિઃ સદા ॥ ૪૫॥

વ્યાયોગેહામૃગૌ ચાપિ સદા કાર્યૌ ત્રિસન્ધિકૌ ।
ગર્ભાવમર્શૌ ન સ્યાતાં તયોર્વૃત્તિશ્ચ કૈશિકી ॥ ૪૬॥

દ્વિસન્ધિ તુ પ્રહસનં વીથ્યઙ્ગો ભાણ એવ ચ ।
મુખનિર્વહને તત્ર કર્તવ્યે કવિભિઃ સદા ॥ ૪૭॥

[વીથી ચૈવ હિ ભાણશ્ચ તથા પ્રહસનં પુનઃ ।
કૈશિકીવૃત્તિહીનાનિ કાર્યાણિ કવિભિઃ સદા ]॥ ૪૮॥

એવં હિ સન્ધયઃ કાર્યા દશરૂપે પ્રયોક્તૃભિઃ ।
પુનરેષાં તુ સન્ધીનામઙ્ગકલ્પં નિબોધદત ॥ ૪૯॥

સન્ધિનાં યાનિ વૃત્તાનિ પ્રદેશેષ્વનુપૂર્વશઃ ।
સ્વસમ્પદ્ગુણયુક્તાનિ તાન્યઙ્ગાન્યુપધારયેત્ ॥૫૦॥

ઇષ્ટસ્યાર્થસ્ય રચના વૃત્તાન્તસ્યાનુપક્ષયઃ ।
રાગપ્રાપ્તિઃ પ્રયોગસ્ય ગુહ્યાનાં ચૈવ ગૂહનમ્ ॥ ૫૧॥

આશ્ચર્યવદભિખ્યાનં પ્રકાશ્યાનાં પ્રકાશનમ્ ।
અઙ્ગાનાં ષડ્વિધં હ્યેતદ્ દૃષ્ટં શાસ્ત્રે પ્રયોજનમ્ ॥૫૨॥

અઙ્ગહીનો નરો યદ્વન્નૈવારમ્ભક્ષમો ભવેત્ ।
અઙ્ગહીનં તથા કાવ્યં ન પ્રયોગક્ષમં ભવેત્ ॥ ૫૩॥

ઉદાત્તમપિ તત્કાવ્યં સ્યાદઙ્ગૈઃ પરિવર્જિતમ્ ।
હીનત્વાદ્ધિ પ્રયોગસ્ય ન સતાં રઞ્જયેન્મનઃ ॥ ૫૪॥

કાવ્યં યદપિ હીનાર્થં સમ્યદઙ્ગૈઃ સમન્વિતમ્ ।
દીપ્તત્વાત્તુ પ્રયોગસ્ય શોભામેતિ ન સંશયઃ ॥ ૫૫॥

[તસ્માત્ સન્ધિપ્રદેશેષુ યથાયોગં યથારસમ્ ।
કવિનાઙ્ગાનિ કાર્યાણિ સમ્યક્તાનિ નિબોધત] ॥ ૫૬॥

ઉપક્ષેપઃ પરિકરઃ પરિન્યાસો વિલોભનમ્ ।
યુક્તિઃ પ્રાપ્તિઃ સમાધાનં વિધાનં પરિભાવના ॥ ૫૭॥

ઉદ્ભેદઃ કરણં ભેદ એતાન્યઙ્ગાનિ વૈ મુખે ।
તથા પ્રતિમુખે ચૈવ શૃણુતાઙ્ગાનિ નામતઃ ॥ ૫૮॥

વિલાસઃ પરિસર્પશ્ચ વિધૂતં તાપનં તથા ।
નર્મ નર્મદ્યુતિશ્ચૈવ તથા પ્રગયણં પુનઃ ॥ ૫૯॥

નિરોધશ્ચૈવ વિજ્ઞેયઃ પર્યુપાસનમેવ ચ ।
પુષ્પં વજ્રમુપન્યાસો વર્ણસંહાર એવ ચ ॥ ૬૦॥

એતાનિ વૈ પ્રતિમુખે ગર્ભેઽઙ્ગાનિ નિબોધત ।
અભૂતાહરણં માર્ગો રૂપોદાહરણે ક્રમઃ ॥ ૬૧॥

સંગ્રહશ્ચાનુમાનં ચ પ્રાર્થનાક્ષિપ્તમેવ ચ ।
તોટકાધિબલે ચૈવ હ્યુદ્વેગો વિદ્રવસ્તથા ॥૬૨॥

એતાન્યઙ્ગાનિ વૈ ગર્ભે હ્યવમર્શે નિબોધત ।
અપવાદશ્ચ સંફેટો વિદ્રવઃ શક્તિરેવ ચ ॥ ૬૩॥

વ્યવસાયઃ પ્રસઙ્ગશ્ચ દ્યુતિઃ ખેદો નિષેધનમ્ ॥

વિરોધનમથાદાનં છાદનં ચ પ્રરોચના ॥ ૬૪॥

વ્યવહારશ્ચ યુક્તિશ્ચ વિમર્શાઙ્ગાન્યમૂનિ ચ ।
સન્ધિર્નિરોધો ગ્રથનં નિર્ણયઃ પરિભાષણમ્ ॥ ૬૫॥

ધ્રુતિઃ પ્રસાદ આનન્દઃ સમયો હ્યુપગૂહનમ્ ।
ભાષણં પૂર્વવાક્યં ચ કાવ્યસંહાર એવ ચ ॥ ૬૬॥

પ્રશસ્તિરિતિ સંહારે જ્ઞેયાન્યઙ્ગાનિ નામતઃ ।
ચતુષ્ષષ્ઠિ બુધૈર્જ્ઞેયાન્યેતાન્યઙ્ગાનિ સન્ધિષુ ॥ ૬૭॥

[સમ્પાદનાર્થં બીજસ્ય સમ્યક્સિદ્ધિકરાણિ ચ ।
કાર્યાણ્યેતાનિ કવિભિર્વિભજ્યાર્થાનિ નાટકે ] ॥ ૬૮॥

પુનરેષાં પ્રવક્ષ્યામિ લક્ષણાનિ યથાક્રમમ્ ।
કાવ્યાર્થસ્ય સમુત્પત્તિરુપક્ષેપ ઇતિ સ્મૃતઃ ॥ ૬૯॥

યદુત્પન્નાર્થબાહુલ્યં જ્ઞેયઃ પરિકરસ્તુ સઃ ।
તન્નિષ્પત્તિઃ પરિન્યાસો વિજ્ઞેયઃ કવિભિઃ સદા ॥ ૭૦॥

ગુણનિર્વર્ણનં ચૈવ વિલોભનમિતિ સ્મૃતમ્ ।
સમ્પ્રધારણમર્થાનાં યુક્તિરિત્યભિધીયતે ॥ ૭૧॥

સુખાર્થસ્યાભિગમનં પ્રાપ્તિરિત્યભિસંજ્ઞિતા ।
બીજાર્થસ્યોપગમનં સમાધાનમિતિ સ્મૃતમ્ ॥ ૭૨॥

સુખદુઃખકૃતો યોઽર્થસ્તદ્વિધાનમિતિ સ્મૃતમ્ ।
કુતૂહલોત્તરાવેગો વિજ્ઞેયા પરિભાવના ॥ ૭૩॥

બીજાર્થસ્ય પ્રરોહો યઃ સ ઉદ્ભેદ ઇતિ સ્મૃતઃ ।
પ્રકૃતાર્થસમારમ્ભઃ કરણં નામ તદ્ભવેત્ ॥ ૭૪॥

સંઘાતભેદનાર્થો યઃ સ ભેદ ઇતિ કીર્તિતઃ ।
[એતાનિ તુ મુખાઙ્ગાનિ વક્ષ્યે પ્રતિમુખે પુનઃ] ॥ ૭૫॥

સમીહા રતિભોગાર્થા વિલાસ ઇતિ સંજ્ઞિતઃ ।
દૃષ્ટનષ્ટાનુસરણં પરિસર્પ ઇતિ સ્મૃતઃ ॥ ૭૬॥

કૃતસ્યાનુનયસ્યાદૌ વિધૂતં હ્યપરિગ્રહઃ ।
અપાયદર્શનં યત્તુ તાપનં નામ તદ્ભવીત્ ॥ ૭૭॥

ક્રીડાર્થં વિહિતં યત્તુ હાસ્યં નર્મેતિ તત્સ્મૃતમ્
દોષપ્રચ્છાદનાર્થં તુ હાસ્યં નર્મદ્યુતિઃ સ્મૃતા ॥ ૭૮॥

ઉત્તરોત્તરવાક્યં તુ ભવેત્પ્રગયણં પુનઃ ।
યા તુ વ્યસનસમ્પ્રાપ્તિઃ સ નિરોધઃ પ્રકીર્તિતઃ ॥ ૭૯॥

ક્રુદ્ધસ્યનુનયો યસ્તુ ભવેત્તત્પર્યુપાસનમ્ ।
વિશેષવચનં યત્તુ તત્પુષ્પમિતિ સંજ્ઞિતમ્ ॥ ૮૦॥

પ્રત્યક્ષરૂક્ષં યદ્વાક્યં વજ્રં તદભિધીયતે ।
ઉપપત્તિકૃતો યોઽર્થ ઉપન્યાસશ્ચ સ સ્મૃતઃ ॥ ૮૧॥

ચાતુર્વર્ણ્યોપગમનં વર્ણસંહાર ઇષ્યતે ।
કપટાપાશ્રયં વાક્યમભૂતાહરણં વિદુઃ ॥ ૮૨॥

તત્ત્વાર્થવચનં ચૈવ માર્ગ ઇત્યભિધીયતે ।
ચિત્રાર્થસમવાયે તુ વિતર્કો રૂપમિષ્યતે ।
યત્સાતિશયવદ્વાક્યં તદુદાહરણં સ્મૃતમ્ ॥ ૮૩॥

ભાવતત્ત્વોપલબ્ધિસ્તુ ક્રમ ઇત્યભિધીયતે ।
સામદાનાદિસમ્પન્નઃ સંગ્રહઃ પરિકીર્તિતઃ ॥ ૮૪॥

રૂપાનુરૂપગમનમનુમાનમિતિ સ્મૃતમ્ ।
રતિહર્ષોત્સવાનાં તુ પ્રાર્થના પ્રાર્થના ભવેત્ ।
ગર્ભસ્યોદ્ભેદનં યત્સાક્ષિપ્તિરિત્યભિધીયતે ॥ ૮૬॥

સંરમ્ભવચનં ચૈવ તોટકં ત્વિતિ સંજ્ઞિતમ્ ।
કપટેનાતિસંધાનં બ્રુવતેઽધિબલં બુધાઃ ॥ ૮૭॥

ભયં નૃપારિદસ્યૂત્થમુદ્વેગઃ પરિકીર્તિતઃ ।
શઙ્કા ભયત્રાસકૃતો વિદ્રવઃ સમુદાહૃતઃ ॥ ૮૮॥

દોષપ્રખ્યાપનં યત્તુ સોઽપવાદ ઇતિ સ્મૃતઃ ।
રોષગ્રથિતવાક્યં તુ સમ્ફેટઃ પરિકીર્તિતઃ ॥ ૮૯॥

ગુરુવ્યતિક્રમો યસ્તુ સ દ્રવઃ પરિકીર્તિતઃ ।
વિરોધિપ્રશમો યશ્ચ સ શક્તિઃ પરિકીર્તિતા ॥૯૦॥

વ્યવસાયશ્ચ વિજ્ઞેયઃ પ્રતિજ્ઞાહેતુસંભવઃ ।
પ્રસઙ્ગશ્ચૈવ વિજ્ઞેયો ગુરૂણા પરિકીર્તનમ્ ॥ ૯૧॥

વાક્યમાધર્ષસંયુક્તં દ્યુતિસ્તજ્જ્ઞૈરુદાહૃતા ।

મનશ્ચેષ્ટાવિનિષ્પન્નઃ શ્રમઃ ખેદ ઉદાહૃતઃ ॥ ૯૨॥

ઇપ્સિતાર્થપ્રતીઘાતઃ પ્રતિષેધઃ પ્રકીર્તિતઃ ।
કાર્યાત્યયોપગમનં વિરોધનમિતિ સ્મૃતમ્ ॥ ૯૩॥

બીજકાર્યોપગમનમાતાનમિતિ સંજ્ઞિતમ્ ।
અપમાનકૃતં વાક્યં કાર્યાર્થં ચ્છાદનં ભવેત્ ॥ ૯૪॥

પ્રરોચના સ વિજ્ઞેયા સંહારાર્થપ્રદર્શિની ।
[પ્રત્યક્ષવચનં યત્તુ સ વ્યાહાર ઇતિ સ્મૃતઃ ॥ ૯૫॥

સવિચ્છેદં વચો યત્ર સા યુક્તિરિતિ સંજ્ઞિતા ।
જ્ઞેયા વિચલના તજ્જ્ઞૈરવમાનાર્થસંયુત] ॥ ૯૬॥

[એતાન્યવમૃશેઽઙ્ગાનિ સંહારે તુ નિબોધત] ।
મુખબીજોપગમનં સન્ધિરિત્યભિધીયતે ॥ ૯૭॥

કાર્યસ્યાન્વેષણં યુક્ત્યા નિરોધ ઇતિ કીર્તિતઃ ।
ઉપક્ષેપસ્તુ કાર્યાણાં ગ્રથનં પરિકીર્તિતમ્ ॥ ૯૮॥

અનુભૂતાર્થકથનં નિર્ણયઃ સમુદાહૃતઃ ।
પરિવાદકૃતં યસ્યાત્તદાહુઃ પરિભાષણમ્ ॥ ૯૯॥

લબ્ધસ્યાર્થસ્ય શમનં દ્યુતિમાચક્ષતે પુનઃ ।
સમાગમસ્તથાર્થાનામાનન્દઃ પરિકીર્તિતઃ ॥ ૧૦૦॥

દુઃખસ્યાપગમો યસ્તુ સમયઃ સ નિગદ્યતે ।
શુશ્રૂષાદ્યુપસમ્પન્નઃ પ્રસાદઃ પ્રીતિરુચ્યતે ॥ ૧૦૧॥

અદ્ભુતસ્ય તુ સમ્પ્રાપ્તિરુપગૂહનમિષ્યતે ।
સામદાનાદિ સમ્પન્નં ભાષણં સમુદાહૃતમ્ ॥૧૦૨॥

પૂર્વવાક્યં તુ વિજ્ઞેયં યથોક્તાર્થપ્રદર્શનમ્ ।
વરપ્રદાનસમ્પ્રાપ્તિઃ કાવ્યસંહાર ઇષ્યતે ॥ ૧૦૩॥

નૃપદેશપ્રશાન્તિશ્ચ પ્રશસ્તિરભિધીયતે ।
યથાસન્ધિ તુ કર્તવ્યાન્યેતાન્યઙ્ગાનિ નાટકે ॥ ૧૦૪॥

કવિભિઃ કાવ્યકુશલૈ રસભાવમપેક્ષ્ય તુ ।
સંમિશ્રાણિ કદાચિત્તુ દ્વિત્રિયોગેન વા પુનઃ ॥ ૧૦૫॥

જ્ઞાત્વા કાર્યમવસ્થાં ચ કાર્યાણ્યઙ્ગાનિ સન્ધિષુ ।
એતેષામેવ ચાઙ્ગાનાં સંબદ્ધાન્યર્થયુક્તિતઃ ॥ ૧૦૬॥

સન્ધ્યન્તરાણિ સન્ધીનાં વિશેષાસ્ત્વેકવિંશતિઃ ।
સામભેદસ્તથા દણ્ડઃ પ્રદાનં વધ એવ ચ ॥ ૧૦૭॥

પ્રત્યુત્પન્નમતિત્વં ચ ગોત્રસ્ખલિતમેવ ચ ।
સાહસં ચ ભયં ચૈવ હ્રીર્માયા ક્રોધ એવ ચ ॥ ૧૦૮॥

ઓજઃ સંવરણં ભ્રાન્તિસ્તથા હેત્વપધારણમ્ ।
દૂતો લેખસ્તથા સ્વપ્નશ્ચિત્રં મદ ઇતિ સ્મૃતમ્ ॥ ૧૦૯॥

[વિષ્કમ્ભચૂલિકા ચૈવ તથ ચૈવ  પ્રવેશકઃ ।
અઙ્કાવતારોઽઙ્કમુખમર્થોપક્ષેપપઞ્ચકમ્ ॥૧૧૦॥

મધ્યમપુરુષનિયોજ્યો નાટકમુખસન્ધિમાત્રસંચારઃ ।
વિષ્કમ્ભકસ્તુ કાર્યઃ પુરોહિતામાત્યકઞ્ચુકિભિઃ ॥ ૧૧૧॥

શુદ્ધઃ સંકીર્ણો વા દ્વિવિધો વિષ્કંભકસ્તુ વિજ્ઞેયઃ ।
મધ્યમપાત્રૈઃ શુદ્ધઃ સંકીર્ણો નીચમધ્યકૃતઃ ॥ ૧૧૨॥

અન્તર્યવનિકાસંસ્થૈઃ સૂતાદિભિરનેકધા ।
અર્થોપક્ષેપણં યત્તુ ક્રિયતે સા હિ ચૂલિકા ॥ ૧૧૩॥

અઙ્કાન્તરાનુસારી સંક્ષેપાર્થમધિકૃત્ય બિન્દૂનામ્ ।
પ્રકરણનાટકવિષયે પ્રવેશકો નામ વિજ્ઞેયઃ ॥ ૧૧૪॥

અઙ્કાન્ત એવ ચાઙ્કો નિપતતિ યસ્મિન્ પ્રયોગમાસાદ્ય ।
બીજાર્થયુક્તિયુક્તો જ્ઞેયો હ્યઙ્કાવતારોઽસૌ ॥ ૧૧૫॥

વિશ્લિષ્ટમુખમઙ્કસ્ય સ્ત્રિયા વા પુરુષેણ વા ।
યદુપક્ષિપ્યતે પૂર્વં તદઙ્કમુખમુચ્યતે ] ॥ ૧૧૬॥

અન્યાન્યપિ લાસ્યવિધાવઙ્ગાનિ તુ નાટકોપયોગીનિ ।
અસ્માદ્વિનિઃસૃતાનિ તુ ભાણ ઇવૈઅકપ્રયોજ્યાનિ ॥ ૧૧૭॥

[ભાણાકૃતિવલ્લાસ્યં વિજ્ઞેયં ત્વેકપાત્રહાર્યં વા ।
પ્રકરણવદૂહ્ય કાર્યાસંસ્તવયુક્તં વિવિધભાવમ્] ॥ ૧૧૮॥

ગેયપદં સ્થિતપાઠ્યમાસીનં પુષ્પગણ્ડિકા ।
પ્રચ્છેદકં ત્રિમૂઢં ચ સૈન્ધવાખ્યં દ્વિમૂઢકમ્ ॥ ૧૧૯॥

ઉત્તમોત્તમકં ચૈવમુક્તપ્રત્યુક્તમેવ ચ ।
લાસ્યે દશવિધં હ્યેતદઙ્ગનિર્દેશલક્ષણમ્ ॥ ૧૨૦ ॥

આસનેષૂપવિષ્ટૈર્યત્તન્ત્રીભાણ્ડોપબૃંહિતમ્ ।
ગાયનૈર્ગીયતે શુષ્કં તદ્ગેયપદમુચ્યતે ॥ ૧૨૧ ॥

[યા નૃત્યત્યાસના નારી ગેયં પ્રિયગુણાન્વિતમ્ ।
સાઙ્ગોપાઙ્ગવિધાનેન તદ્ગેયપદમુચ્યતે ] ॥ ૧૨૨ ॥

પ્રાકૃતં યદ્વિયુક્તા તુ પઠેદાત્તરસં સ્થિતા ।
મદનાનલતપ્તાઙ્ગી સ્થિતપાઠ્યં તદુચ્યતે ॥ ૧૨૩ ॥

[બહુચારીસમાયુક્તં પઞ્ચપાણિકલાનુગમ્ ।
ચઞ્ચત્પુટેન વા યુક્તં સ્થિતપાઠ્યં વિધીયતે ] ॥ ૧૨૪ ॥

આસીનમાસ્યતે યત્ર સર્વાતોદ્યવિવર્જિતમ્ ।
અપ્રસારિતગાત્રં ચ ચિન્તાશોકસમન્વિતમ્ ॥ ૧૨૫ ॥

નૃત્તાનિ વિવિધાનિ સ્યુર્ગેયં ગાને ચ સંશ્રિતન્ ।
ચેષ્ટાભિશ્ચાશ્રયઃ પુંસા યત્ર સા પુષ્પગણ્ડિકા ॥ ૧૨૬ ॥

[યત્ર સ્ત્રી નરવેષેણ લલિતં સંસ્કૃતં પઠેત્ ।
સખીનાં તુ વિનોદાય સા જ્ઞેયા પુષ્પગણ્ડિકા ॥ ૧૨૭ ॥

નૃત્તં તુ વિવિધં યત્ર ગીતં ચાતોદ્યસંયુતમ્ ।
સ્ત્રિયઃ પુંવચ્ચ ચેષ્ટન્તે સા જ્ઞેયા પુષ્પગણ્ડિકા] ॥ ૧૨૮ ॥

પ્રચ્છેદકઃ સ વિજ્ઞેયો યત્ર ચન્દ્રાતપાહતાઃ ।
સ્ત્રિયઃ પ્રિયેષુ સજ્જન્તે હ્યપિ વિપ્રિયકારિષુ ॥ ૧૨૯ ॥

અનિષ્ઠુરશ્લક્ષ્ણપદં સમવૃત્તૈરલઙ્કૃતમ્ ।
નાટ્યં પુરુષભાવાઢ્યં ત્રિમૂઢકમિતિ સ્મૃતમ્ ॥ ૧૩૦ ॥

પાત્રં વિભ્રષ્ટસંકેતં સુવ્યક્તકરણાન્વિતમ્ ।
પ્રાકૃતૈર્વચનૈર્યુક્તં વિદુઃ સૈન્ધવકં બુધાઃ ॥ ૧૩૧ ॥

[રૂપવાદ્યાદિસંયુક્તં પાઠ્યેન ચ વિવર્જિતમ્ ।
નાટ્યં હિ તત્તુ વિજ્ઞેયં સૈન્ધવં નાટ્યકોવિદૈઃ] ॥ ૧૩૨ ॥

મુખપ્રતિમુખોપેતં ચતુરશ્રપદક્રમમ્ ।

શ્લિષ્ટભાવરસોપેતં વૈચિત્ર્યાર્થં દ્વિમૂઢકે ॥ ૧૩૩॥

ઉત્તમોત્તમકં વિદ્યાદનેકરસસંશ્રયમ્ ।
વિચિત્રૈઃ લોકબન્ધૈશ્ચ હેલાહાવવિચિત્રિતમ્ ॥ ૧૩૪॥

કોપપ્રસાદજનિતં સાધિક્ષેપપદાશ્રયમ્ ।
ઉક્તપ્રત્યુક્તમેવં સ્યાચ્ચિત્રગીતાર્થયોજિતમ્ ॥ ૧૩૫॥

યત્ર પ્રિયાકૃતિં દૃષ્ટ્વા વિનોદયતિ માનસમ્ ।
મદનાનલતપ્તાઙ્ગી તચ્ચિત્રપદમુચ્યતે ॥ ૧૩૬॥

દૃષ્ટ્વા સ્વપ્ને પ્રિયં યત્ર મદનાનલતાપિતા ।
કરોતિવિવિધાન્ ભાવાંસ્તદ્વૈ ભાવિકમુચ્યતે ॥ ૧૩૭॥

એતેષાં લાસ્યવિધૌ વિજ્ઞેયં લક્ષણં પ્રયોગજ્ઞૈઃ ।
તદિહૈવ તુ યન્નોક્તં પ્રસઙ્ગવિનિવૃત્તહેતોસ્તુ ॥૧૩૮॥

પઞ્ચસન્ધિ ચતુર્વૃત્તિ ચતુઃષષ્ટ્યઙ્ગસંયુતમ્ ।
ષટ્ત્રિંશલ્લક્ષણોપેતં ગુણાલઙ્કારભૂષિતમ્ ॥ ૧૩૯॥

મહારસં મહાભોગમુદાત્તવચનાન્વિતમ્ ।
મહાપુરુષસંચારં સાધ્વાચારજનપ્રિયમ્ ॥૧૪૦॥

સુશ્લિષ્ટસન્ધિસંયોગં સુપ્રયોગં સુખાશ્રયમ્ ।
મૃદુશબ્દાભિધાનં ચ કવિઃ કુર્યાત્તુ નાટકમ્ ॥૧૪૧॥

અવસ્થા યા તુ લોકસ્ય સુખદુઃખસમુદ્ભવા ।
નાનાપુરુષસંચારા નાટકેઽસૌ વિધીયતે ॥ ૧૪૨॥

ન તજ્જ્ઞાનં ન તચ્છિલ્પં ન સા વિદ્યા ન સા કલા ।
ન તત્ કર્મ ન વા યોગો નાટ્યેઽસ્મિન્યન્ન દૃશ્યતે ॥ ૧૪૩॥

યોઽયં સ્વભાવો લોકસ્ય નાનાવસ્થાન્તરાત્મકઃ ।
સોઽઙ્ગાદ્યભિનયૈર્યુક્તો નાટ્યમિત્યભિધીયતે ॥ ૧૪૪॥

દેવતાનામૃષીનાં ચ રાજ્ઞાં ચોત્કૃષ્ટમેધસામ્ ।
પૂર્વવૃત્તાનુચરિતં નાટકં નામ તદ્ભવેત્। ॥૧૪૫॥

યસ્માત્સ્વભાવં સંત્યજ્ય સાઙ્ગોપાઙ્ગગતિક્રમૈઃ ।
પ્રયુજ્યતે જ્ઞાયતે ચ તસ્માદ્વૈ નાટકં સ્મૃતમ્। ॥૧૪૬॥

સર્વભાવૈઃ સર્વરસૈઃ સર્વકર્મપ્રવૃત્તિભિઃ ।
નાનાવસ્થાન્તરોપેતં નાટકં સંવિધીયતે ॥ ૧૪૭ ॥

[અનેકશિલ્પજાતાનિ નૈકકર્મક્રિયાણિ ચ ।
તાન્યશેષાણિ રૂપાણિ કર્તવ્યાનિ પ્રયોક્તૃભિઃ ] ॥ ૧૪૮ ॥

લોકસ્વભાવં સંપ્રેક્ષ્ય નરાણાં ચ બલાબલમ્ ।
સંભોગં ચૈવ યુક્તિં ચ તતઃ કાર્યં તુ નાટકમ્ ॥ ૧૪૯ ॥

ભવિષ્યતિ યુગે પ્રાયો ભવિષ્યન્ત્યબુધા નરાઃ ।
યે ચાપિ હિ ભવિષ્યન્તિ તે યત્નશ્રુતબુદ્ધયઃ ॥ ૧૫૦ ॥

કર્મશિલ્પાનિ શાસ્ત્રાણિ વિચક્ષણબલાનિ ચ ।
સર્વાણ્યેતાનિ નશ્યન્તિ યદા લોકઃ પ્રણશ્યતિ ॥ ૧૫૧ ॥

તદેવં લોકભાષાણાં પ્રસમીક્ષ્ય બલાબલમ્ ।
મૃદુશબ્દં સુખાર્થં ચ કવિઃ કુર્યાત્તુ નાટકમ્ ।૧૫૨ ॥

ચૈક્રીડિતાદ્યૈઃ શબ્દૈસ્તુ કાવ્યબન્ધા ભવન્તિ યે ।
વેશ્યા ઇવ ન તે ભાન્તિ કમણ્ડલુધરૈર્દ્વિજૈઃ ॥ ૧૫૩ ॥

દશરૂપવિધાનં ચ મયા પ્રોક્તં દ્વિજોત્તમાઃ ।
અતઃ પરં પ્રવક્ષ્યામિ વૃત્તીનામિહ લક્ષણમ્ ॥૧૫૪ ॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે સન્ધિનિરૂપણં નામધ્યાય એકોનવિંશઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 19*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*